अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV 301**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा - दिसम्बरमासः - 2017**

**बी. ए. व्याकरण (सेमेस्टर - तृतीय)**
**संस्कृत-व्याकरणम्**
**संस्कृत-व्याकरणम् - खण्ड तीन (क)**

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 75**

**सूचना : इदं प्रश्नपत्रं पञ्चसप्तत्यङ्कानां वर्त्तते। इदं अ, ब, स इति त्रिषु खण्डेषु विभक्तमस्ति।**

## खण्डः-अ
### (दीर्घोत्तराः प्रश्नाः)

**सूचना : 'अ' खण्डे पञ्च दीर्घोत्तराः प्रश्नाः दत्ताः सन्ति, तेषु त्रयाणाम् उत्तरं दीयताम् । प्रत्येकं प्रश्नस्य कृते पञ्चदश अङ्काः निर्धारिताः सन्ति।** **(3×15=45)**

1. 'गुप्तिज्किद्भ्यः सन्' इति सूत्रं सोदाहरणं विविच्यताम्।
2. 'सुपः, आत्मनः क्यच्' इत्यस्य सूत्रस्य स्वग्रन्थानुसारं व्याख्या विधेया।
3. नन्दनः, परिचाय्यः, जनमेजयः, भुक्तवान्, जीर्णः, पवमानः, चेयम्, लभ्यम्, अपुषत्, गद्यम्, शक्यम् एषु केचन पञ्चैव प्रयोगाः साधनीयाः ।
4. 'एजेः खश' इति सूत्रं सोदाहरणं प्रस्तूयताम्।
5. 'निष्ठा' इति सूत्रं काशिकामनुसृत्य प्रतिपाद्यताम्।

## खण्डः-'ब'
### (लघूत्तराः प्रश्नाः)

**अयं खण्डः प्रथमद्वितीयोपखण्डरूपेण विभक्तोऽस्ति। प्रत्येकं खण्डे दत्तानां निर्देशाणाम् अनुसरणपूर्वकमेव प्रश्नानां समाधानं करणीयमस्ति।**

### (उपखण्डः- प्रथमः)

**सूचना : प्रथमे उपखण्डे षट् (6) लघूत्तराः प्रश्नाः दत्ताः सन्ति, प्रत्येकं प्रश्नस्य कृते चत्वारः अङ्काः निर्धारिताः सन्ति। तत्र केषाञ्चित् चतुर्णां प्रश्नानामुत्तरं देयम्।** **(4×4=16)**

1. 'लटः शतृशानचावप्रथमासमानाधिकरणे' इति सूत्रं प्रतिपादनीयम् ।
2. 'तृन्' इति सूत्रं स्वग्रन्थानुसारं विविच्यताम्।
3. 'आतो मनिन्क्वनिब्वनिपश्च' इति सूत्रं सोदाहरणं प्रस्तूयताम्।
4. 'अमावस्यदन्यतरस्याम्' इति सूत्रं यथाग्रन्थं विवेचनीयम्।
5. 'तत्रोपपदं सप्तमीस्थम्' इति सूत्रं स्वग्रन्थोक्तरीत्या विविच्यताम्।
6. 'शल इगुपधादनिटः क्सः' इति सूत्रं यथाग्रन्थं व्याख्येयम्।

## (उपखण्डः–द्वितीयः)

**सूचनाः लघूत्तराणां प्रश्नानाम् अस्मिन्नुपखण्डे त्रयः संस्कृतगद्यांशाः दत्ताः सन्ति। तत्र द्वयोः संस्कृतगद्यांशयोः हिन्दीभाषया संस्कृतेन वा व्याख्या करणीया। प्रत्येकं गद्यांशस्य कृते पञ्च अङ्काः निर्धारिताः सन्ति।** **(2×5=10)**

7. क– 'तपस्तपः कर्मकस्यैव' 'तप संतापे', अस्य कर्ता कर्मवद्भवति। स च तपः कर्मकस्यैव, नान्यकर्मकस्य। क्रियाभेदाद्विध्यर्थमेतद्। उपवासादीनि तपांसि तापसं तपन्ति। दुःखयन्तीत्यर्थः। स तापसस्त्वगस्थिभूतः स्वर्गाय तपस्तप्यते। अर्जयतीत्यर्थः। पूर्वेणाप्राप्तः कर्मवद्भावो विधीयते – तप्यते तपस्तापसः, अतप्त तपस्तापसः। तपः कर्मकस्यैवेति किम्? उत्तपति सुवर्णं सुवर्णकारः।।

ख– 'कर्मण्यण्' इत्यतः प्रारभ्य अग्रे दशसूत्राणि लेख्यानि।

ग– "संपृचानु#धा –०" इति सूत्रं प्रपूर्य सवृत्तिसहितं विवेचनीयम्।

# खण्डः–स

## (अतिलघूत्तराः प्रश्नाः)

**सूचना : 'स' खण्डे चत्वारः अतिलघूत्तराः प्रश्नाः दत्ताः सन्ति। प्रत्येकं प्रश्नस्य कृते एकैकोऽङ्को निर्धारितोऽस्ति। एतस्य खण्डस्य सर्वे प्रश्नाः अनिवार्याः सन्ति।** **(04×1=04)**

1. त्यदादिषूपपदेषु कस्माद्धातोः कस्मिन्नर्थे कः प्रत्ययः?
2. 'क्रोधनः' इत्यत्र केन सूत्रेण कः प्रत्ययो भवति?
3. 'जागरूकः' इत्यस्य सूत्रस्य वृत्तिर्लेखनीया?
4. 'कर्मस्थः पचतेर्भावः – ०' इत्येषा कारिका पूरणीया?

---------------x---------------